IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# आचार्यभर्तृहरेः शब्दाद्वैतमाचार्यशङ्करस्य ब्रह्माद्वैतम्

**अनुजः , शोधछात्रः , संस्कृत विभागः, गुजरात विश्वविद्यालयः**

शब्दधातुः चुरादिगणे पठितोऽस्ति, उपसर्गपूर्वकं तथा उपसर्गरहितम्। अस्य धातोः आविष्कारं, भाषणञ्च अर्थद्वयमस्ति, अस्य द्वे व्युत्पत्ती स्तः–

१. शब्द्यते - आविष्क्रियतेऽर्थः अनेन, करणार्थकल्युटं प्रत्ययं बाधित्वा घञ्प्रत्ययस्य करणेनास्यार्थः भविष्यति -अर्थस्य प्रकाशकः।

२. शब्द्यते - ध्वनिना अभिव्यज्यते,अनेन विग्रहेण कर्मणि अर्थे घञ् प्रत्ययमनात् अस्यार्थः - ध्वनिभिः अभिव्यक्तमर्थरूपं वाक्तत्वं भविष्यति।

दार्शनिकैः एकः तृतीयोऽपि अर्थः निःसारितः – शब्द्यते-अभिव्यज्यते ब्रह्म येन सः परब्रह्मादिप्रतिपादकं प्रणवम्।

महाभाष्यकारेण शब्दस्य परिभाषा द्वाभ्यां प्रकाराभ्यां कृता अस्ति –

**येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः।**[१] अर्थस्य बोधं कारयितुमुच्चरिताः भवन्ति। व्यवहारविषयभूत्वात् अभिन्नशब्दे समाजदेशानुसारं तथा च कालानुसारं बाह्यपरिवर्त्तनानि अपि भवन्ति। यथा भर्तृहरेः मतमस्ति –

परम्पराया यदा वक्तुः वदनशक्त्याः ह्रासो भवितुं लगति तु संस्कृतशब्दानाम् अपभ्रंश आरम्भो भवति। यथा घटेन घटः, गृहेण गृहम्, पित्रा पिता, जनकादि अपभ्रंश निर्मिताः शब्दाः दृश्यन्ते। परन्तु अर्थबोधे किञ्चिदप्यन्तरं नायाति।

[१] महाभाष्यपस्पशाह्निकम्

योऽर्थः घटस्य वर्त्तते स एव घटस्य। अस्मिन्नपि सिद्धः भवति यत् व्यावहारिकदशायां शब्दस्य केवलं बाह्याकृत्यां परिवर्त्तनमथवा परिवर्धनं भवति, आन्तर्नित्यार्थेन अभिन्नशब्दस्तु एक एव वर्त्तते।

आचार्यो भर्तृहरिः वाक्यपदीये शब्दब्रह्मणः विषयं प्रतिपादयति। आचार्येण शङ्करेण ब्रह्मसूत्रभाष्ये ब्रह्मणोऽद्वैतत्वं प्रत्यपादीति उभयोः आचार्ययोः तुलनात्मकमध्ययनमत्र यथाप्रसङ्गमुपस्थाप्यते। आत्मब्रह्मैक्यस्य प्रतिपादनस्य प्रसङ्गे पूर्वपक्षे केनोपनिषदि उपास्यस्य तथा उपासकस्यान्तरं निरूपणं कुर्वन् उच्यते यत् आत्मा (जीव), कर्म, उपासनादिभिः साधनैः ब्रह्मणः (परमात्मनः) प्राप्तिं कर्तुमिच्छति। अतः उपासकाद् भिन्नं द्वितीयम् उपास्यं (ब्रह्म, विष्णुः, इन्द्रादिः) भवेत्। तार्किकोऽपि जीवात्मनः ज्ञानेन परमात्मनः प्राप्तिं मन्यते। मीमांसकाः 'अमुं यज', 'अमुं यज' कथयन्तः याजकाद् भिन्नम् आराध्यं स्वीक्रियन्ते। अत: यः उपास्योऽस्ति सः ब्रह्म, तस्माद् भिन्नः उपासकोऽस्ति। तदा उभयोरैक्यं कथं भविष्यति अस्मिन् सन्देहे सिद्धान्तः विज्ञापितोऽस्ति –

**यद् वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।।**[१]

अस्यार्थोऽयम् - यद् चैतन्यमात्रं स्वरूपं क्रमरहितं शब्दतत्त्वमस्ति तथा वर्णपदवाक्यरूपी- क्रमवतीवाण्या (वैखरी) न कथयितुं शक्यते, तद् ब्रह्म वर्त्तते।

कठोपनिषदि ब्रह्मजिज्ञासुं नचिकेतसं ब्रह्मणः उपदेशं कुर्वता यमराजेनोक्तम् –

**सर्वे वेदाः यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।**

**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ओमित्येतत्॥**[२]

**'ओमित्येकाक्षरं ब्रह्म'**[३], **'तदेतदक्षरं ब्रह्म'**[४], **'ओमित्येकाक्षरमिदं सर्वं तस्योपाख्यानम्'**[५] इत्यादिषु श्रुतिषु अक्षरम् (शब्द) ब्रह्म मतम्। अन्यत्र शब्दब्रह्मज्ञानं परब्रह्मज्ञानस्य साधनमपि मतमस्ति –

**द्वे विद्ये वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।।**[६]

---

[१] केनोपनिषद् – १/४

[२] कठोपनिषद् – १/२/१५

[३] ब्रह्मविद्योपनिषद्

[४] मुण्डकोपनिषद् – २/२/२

[५] माण्डूक्य - १

[६] ब्रह्मविन्दूपनिषद्

महावैयाकरणभर्तृहरिणा शब्दतत्त्वं ब्रह्म मत्वा तदपि आद्यन्तरहितम् अक्षरयुक्तं तथा चाखिलं प्रपञ्चं तस्य विवर्त्तः (अविद्यायाः कारणमन्यथा घटपटादिरूपेणाभासः) विज्ञापितः अस्ति।[१] अग्रे तेनैव स्वोपज्ञटीकायां लिखितमस्ति –

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्। विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते॥**[२]

इदं जगत् शब्दरूपं वर्त्तते। शब्दस्य शक्तिरेव अस्य परिचायिका वर्त्तते। अनेन समस्तं विश्वमयथार्थस्य प्रवृत्तिनिवृत्याः विभागः शब्देनैव क्रियते। इदं स्पष्टं वर्त्तते यत् अर्थस्य स्थितिः, प्रवृत्ति-निवृत्यामेव भवति। यदि इदं ब्रह्म शब्दात्मकं न भवेच्चेत् शब्देन अस्य बोधः न भवेत् तथा इदं जगत् शब्दरूपब्रह्मणः मात्रासु (शक्तिषु) अभिव्यक्तमभूत् अन्यत् प्रलयस्यावसरे स्वोपादानकारणीभूतासु तासु शक्तिषु विलीनं भवति।

'**वागेव विश्वा भुवनानि जज्ञे, वागेवेदं बुभुजे**'[३] इति श्रुत्या इदं प्रकटीभूतं भवति यत् विश्वस्य उत्पादिका, पालिका तथा संहारकर्त्री शक्तिः वाग् (वाणी) वर्त्तते। एवं विधिः '**यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यं प्रत्यभिसंविशन्ति**'[४] श्रुतिःब्रह्मणः जगत्कर्तृत्वं पालकत्वं तथा संहारकारकत्वं प्रतिपादयति। एते उभेश्रुती मेलयित्वा अवगमनवाचोब्रह्मणश्चैक्यं सिद्धं भवति। सर्वदर्शनसङ्ग्रहे स्वामिशङ्करचैतन्यभारतिना अस्य समर्थनं कृतमस्ति। मन्त्रनित्यत्वपरकाणि सर्वाणि प्रमाणानिशब्दब्रह्मणः समर्थकानि सन्ति। मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशत्यां देव्यपि 'शब्दात्मिका'उक्ता अस्ति।[५]

शब्दानुशासनस्य प्रयोजनानि विज्ञापयता महाभाष्यकारेण पतञ्जलिना ऋग्वेदस्य एकः मन्त्रः उद्धृतः –

**चत्वारि शृंगाः त्रयो अस्य पादाद्वे शीर्षे सप्त हस्तासो अस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश॥**[६]

---

[१] वाक्यपदीयम् – १/१

[२] तदेव – १/१ स्वोपज्ञवृत्ति

[३] मैत्रायणी उपनिषद् – प्र. – ६, क. - २२

[४] तैत्तिरीयोपनिषद् – ३/१/१

[५] दुर्गासप्तशती – ४/१०

[६] ऋग्वेद – ४/५८/३, महाभाष्यम्, पस्पशाह्निकम्

अस्यार्थः वर्तते शब्दशास्त्रं प्रतिपाद्यो वृषभाकारः शब्दस्वरूपो महान्देवः (ब्रह्म) मरणशीलमनुष्याणाम् अन्तःकरणे प्रविष्टो वर्तते। अस्य नामाख्यातोपसर्गनिपातरूपिणी चत्वारि शृङ्गाणि सन्ति, भूत्, भविष्यत्, वर्तमान एते त्रयः काला एव त्रयः पादास्सन्ति। द्वे (नित्यः कार्यश्च) शीर्षे स्तः तथा प्रथमाद्वितीयादिसप्तविभक्तयः एव सप्त हस्ताः सन्ति।उरसि कण्ठे शिरसि बद्धः एषः शब्दरूपी महान्देवः निरन्तरं शब्दं करोति। एवं महान्देवो सायुज्यं प्राप्तुं व्याकरणस्य अध्ययनं कुर्यात्।

❖ **आचार्यभर्तृहरेः शब्दाद्वैतम्**

अयं सर्ववागर्थप्रपञ्चोपादानभूतप्रणवरूपः, यः किलेत्थमाम्नायते "ओंकार एव सर्वा वाक्। सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इति। बह्वी = पदवाक्यरूपा। नानारूपा = घटपटादिरूपा चेत्यर्थः।

अयमेव स्फोटो वाक्यपदीये भर्तृहरिणावर्णितः–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[१]

तथा आन्तरस्फोटात् बाह्यस्फोटस्योदयोऽन्यत्र पठ्यते। प्रथममान्तरस्फोटमाह–

**समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः। हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते॥**[२]

यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधात् अस्माभिरपि श्रूयते स इत्यर्थः।

**ततोऽभूत् त्रिवृदोंकारः योऽव्यक्तप्रभवः स्वराट्। यत्तल्लिङ्गं भगवतः ब्रह्मणः परमात्मनः॥शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्। येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥ स्वधाम्नो ब्रह्मणः साक्षात् वाचकः परमात्मनः। स सर्वबीजमन्त्रोपनिषद्बीजं सनातनम्॥**[३]

---

[१] वाक्यपदीयम् – १/१

[२] भागवतम् – १२/६/३७

[३]श्रीमद्भागवतम् – १२/६/३९-४१

'**वागेव विश्वा भुवनानि जज्ञे**'[१] श्रुतिप्रमाणितं वाग्रूपि शब्दतत्त्वमेव ब्रह्मवर्त्तते। अन्यत् इदं शब्दब्रह्मणः वाक्यपदीयब्रह्मकाण्डस्य प्रधानः प्रतिपाद्यविषयो वर्त्तते। इदं लक्ष्यीकृत्यैव वाक्यपदीयकारेण आचार्यभर्तृहरिणा ग्रन्थस्य प्रारम्भे सर्वप्रथमं वस्तुनिर्देशात्मकं मङ्गलाचरणस्य माध्यमेन मङ्गलस्वरूपं शब्दब्रह्मणः स्मरणं कृतम् –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**[२]

यत् शब्दतत्त्वम् उत्पत्तिविनाशेन रहितमस्ति, यद् विकारहीनं व्यापकञ्चास्ति तथा यस्मात् सम्पूर्णसंसारस्य समस्तक्रिया-कलापं सञ्चालितं भवति तदेव शब्दतत्वात्मकं अक्षरब्रह्म अर्थरूपे विवर्त्तितं भवति। स्वयं भर्तृहरिः अस्य मङ्गलाचरणस्य वृत्तौ स्पष्टं लिखति–

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्। विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।**[३]

वाक्यपदीयं व्याकरणनिकाये आकरग्रन्थेषु प्रतिष्ठितं वर्त्तते, तद् निर्विवादं सिद्धमस्ति। यथा यत् वाक्यपदीयग्रन्थनाम्ना स्वयं व्यक्तं भवति। वाक्य-पद-प्रतिपादकः ग्रन्थः अथवा वाक्य-प्रतिपादकग्रन्थः। विचारकाणामत्र पर्यन्तं मतमस्ति यत् वाक्यपदीयस्य प्रत्येकं कारिका महाभाष्यस्य किमपि न किमपि अंशमुद्दिश्य लिखितमस्ति। यदपि भवेत्, इदं सर्वमान्यं वर्त्तते यत् वाक्यपदीयं व्याकरणशास्त्रीयः व्यावहारिकदार्शनिकोभयविधसिद्धान्तानां प्रतिपादकः प्रामाणिको ग्रन्थोऽस्ति। अस्मिन्नपि इदं प्रथमं ब्रह्मकाण्डमेव प्रधानरूपेण व्याकरणशास्त्रस्यदार्शनिकमहत्वं प्रतिपादयति।

दार्शनिकमूलतत्वप्रतिपादकः एकमात्रं वेदोऽस्ति अन्यत्तत्वज्ञातृभिः वेदस्य इदं प्रधानमङ्गं मतम्–

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः। प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।**[४]

**अत्रातीतविपर्यासः केवलामनुपश्यति। छन्दस्यश्छन्दसां योनिमात्माछन्दोमयीं तनुम्॥**[५]

एतावदेव न आचार्यप्रवरभर्तृहरिणा मोक्षस्य द्वारस्वरूपं व्याकरणशास्त्रं साधितम्–

---

[१] मैत्रायणी उपनिषद् – ६/२२

[२] वाक्यपदीयम् – १/१

[३] वाक्यपदीयम् – १/१ स्वोपज्ञवृत्ति

[४]वाक्यपदीयम् – १/११ स्वोपज्ञवृत्ति

[५] तदेव – १/१७

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।**[१]

मात्रं मोक्षद्वारमेव न अपितु सरलसोपानं मार्गस्वरूपम् अपि वर्त्तते। अनेन माध्यमेन सरलतापूर्वकं श्रुतिप्रतिपादितं दार्शनिकतत्त्वं अनायासेन प्राप्तुं शक्यते। अनेन मोक्षःसुलभः भवति –

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्। इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।**[२]

एतावता व्याकरणशास्त्रस्य मर्ममाहात्म्यं दर्शितम्। ब्रह्मशब्दस्य निर्माणं निर्मितिरथवा रचना वर्त्तते। (शब्देनोपादानेन हेतुना निर्माणं यस्य तद् शब्दनिर्माणम्) शब्दस्य शक्तयः अस्य कारणं भवन्ति। शब्दस्य शक्तिभिः इदं विवृत्तं भवतिरन्यत् तास्वेव शब्दशक्तिषु विलीनं भवति।

शब्दतत्त्वस्य विषये यद् विवरणं दत्तमस्ति, तद् दर्शनीयं वर्त्तते –

इह **द्वौ शब्दात्मानौ - नित्यः कार्यश्च।**[३] तत्र कार्यो व्यावहारिकः पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राही नित्यस्तु - सर्वव्यवहारयोनिः संस्कृतक्रमः सर्वेषामन्तासन्निवेशी प्रभवो विकाराणम् आश्रयः कर्मणाम्अधिष्ठानं सुखदुःखयोः सर्वत्राप्रतिहतकार्यशक्तिः घटादिनिरुद्ध इव प्रकाशः परिग्रहीतभोगक्षेत्रावश्विः सर्वभूर्मीनामपरिमाणाप्रकृतिः सर्वप्रबोधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबोधानुकारी, प्रवृत्ति-निवृत्ति-पदाभ्यां पर्जन्यवत् दावाग्निवच्च प्रसवोच्छेदशक्तियुक्तः, सर्वेश्वरः, सर्वशक्तिमहान् शब्दवृषभः। तस्मिन् खलु वाग्योगविदो विच्छिद्याहङ्कारग्रन्थीन् अत्यन्तनिर्विभागेन संसृज्यन्ते॥

❖ **आचार्यशङ्करस्य ब्रह्माद्वैतम्**

वेदान्तस्य परमाचार्येण भगवता शङ्कराचार्येणापि वेदान्तदर्शनस्य देवताधिकरणे स्फोटवादस्य चर्चा तु कृतास्ति, परन्तु अन्ते तस्य खण्डनं कृत्वा मीमांसकानां वर्णनित्यतावादस्यैव समर्थनं कृतम् अस्ति। परन्तु भामतीकारवाचस्पतिमिश्रेण अनेकेषु स्थलेषु स्फोटवादस्यसमर्थनं कृतमस्ति।

अद्यत्वे स्फोटवादस्य प्रथमः प्रचारकः भगवान् पतञ्जलिरेव मन्यते। अस्य पश्चात् महावैयाकरणभर्तृहरिणा आगमशास्त्रस्यैव आधारे स्फोटतत्त्वस्य विशदं विवेचनं कृत्वा पदवाक्यस्फोटस्य स्पष्टीकरणं कृतमस्ति। अत्र पर्यन्तं

---

१ वाक्यपदीयम् – १/१४

२ तदेव – १/१६

३ महाभाष्यपस्पशाह्निकम्

न, अपितु '**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्**'[१] इदमुक्त्वा व्याकरणशास्त्रस्य स्तुतिः कृतास्ति अन्यत् तद् मुक्तेः पद्धतिरपि उक्तम्।

स्फोटशब्दस्य विकासः आगमशास्त्रस्य आधारैरेव मन्यन्ते। एवं तु समस्तविद्यानां मूलाधारं वेदेनेव मन्यन्ते, परन्तु अस्य स्फोटवादस्य विकासः आगमशास्त्रस्य आधारे व्याकरणशास्त्रम् एव जातम्। अस्मिन् कोऽपि सन्देहः नास्ति। वैदिकसृष्टिप्रकरणे पुरुषत्रयाणां विवेचनं कृतम् - क्षराक्षराव्ययश्चेति। अस्मिन् प्रत्येकं पञ्च-पञ्चकलाःविज्ञापिताः। अस्मिन् अव्ययपुरुषस्य य आनन्दः, विज्ञानं, मनः, प्राणम् अन्यत् वाक् नाम्नः पञ्चकलाः सन्ति, तस्मिन् वाक्कलाया व्याकरणे स्फोट इति नाम दत्तमस्ति, एषा वैदिकविदुषां मान्यता वर्त्तते। '**उतत्वः पश्यन्न ददर्श वाचम्**'[२], '**चत्वारि वाक्परिमिता पदानि**'[३] इत्यादिश्रुतिषु प्रकृतस्फोटस्य वर्णनं वाक्शब्देनैव कृतोऽस्ति। तैत्तिरीयब्राह्मणेऽपि स्फोटस्य वाक्शब्देन एव व्यवहारः कृतोऽस्ति –

**वाचं देवा उपजीवन्ति विश्वे वाचं गन्धर्वा पशवो मनुष्याः। वाचीमा विश्वा**
**भुवनान्यर्पिता सानो हवं जुषतामिन्द्रपत्नी॥** [४]

अर्थात् सम्पूर्णदेवता, गन्धर्वः, पशुरन्यत् मनुष्यवाचः आधारे जीविताः तिष्ठनि, इदं समस्तब्रह्माण्डवाण्याम् एवावलम्बितं वर्त्तते। शतपथब्राह्मणेऽपि उक्तमस्ति यत् –'**यद् वै प्रजापतेः परमस्ति वागेव तत्**'[५] अर्थात् यद् प्रजापतेरपि परतत्त्वमस्ति, तद् वाक् एव वर्त्तते। अस्मिन्नाधारे परमहावैयाकरणभर्तृहरिणा 'स्वरूपज्योतिरेवान्तः परावागनपायिनी' उक्त्वा आत्मतत्त्वस्य रूपे परावाचः व्यवस्थापनं कृतमस्ति।

अग्रे यत्र श्रुतिषु सृष्ट्याः विवरणं कृतमस्ति तत्रापि अनेन परावाक्स्वरूपात्मतत्वेन सर्वप्रथमं शब्दघनरूपाकाशस्यैव उत्पत्तिः मतास्ति –'**तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशवद्वायुः वायोरग्निः**'[६] इत्यादि।

---

[१] वाक्यपदीयम् – १/१४
[२] ऋग्वेद – १०/७१/४
[३] तदेव - १/१६४/४५
[४] तैत्तिरीयब्राह्मण – २/८/८/४
[५] शतपथब्राह्मणम्
[६] तैत्तिरीय उपनिषद् – २/१/२

'**पृषोदरादीनि यथोपदिष्टम्**'[१] सूत्रस्य भाष्ये कस्य उच्चरिताः शब्दाः साधवः तिष्ठन्ति? अस्य प्रश्नस्योत्तरे भाष्यकारेणोक्तम् - शिष्टानाम्। शिष्टाश्च वैयाकरणा एवम् अस्य पश्चात् किञ्चिदन्तरेण प्रतीकं नीत्वा वाक्यपदीये उक्तम् –

**आविर्भूतप्रकाशानामनुपप्लुतचेतसाम्। अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते॥ अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा। ये भावं वचनं तेषां नानुमानेन बाध्यते।।**[२]

अनेके कवयःविद्वांसोऽन्यत् लेखकाः वैखरीवाण्याः उच्चारणं विनापि गद्यादीनां रचनां कुर्वन्ति। तान् लिखित्वा स्व इष्टमित्राणां पार्श्वं प्रेषयन्ति अन्यत् पाठकाः अपि तान् पठित्वा अर्थबोधं कुर्वन्ति। अत्र वैखरीवाण्याः व्यापारं किमपि नास्ति, केवलं लिप्याः सङ्केतनेनैव मध्यमावाण्याः शाब्दबोधः भवति। शब्दानां सङ्केतस्य ज्ञानमपि मध्यमायामेव भवति। अनेनैव अभिप्रायेण भर्तृहरिणा लिखितम् –

**वैखर्या हि कृतो नादः परश्रवणगोचरः।मध्यमाया कृतो नादः स्फोट व्यञ्जक उच्यते।।**[३]

अर्थात् वैखरीवाण्या यः नादः क्रियते, सः केवलं अन्यश्रवणस्यैव विषयो भवति, तेन अर्थस्य बोधः न भवति। हृदयस्थमध्यमावाण्या यः नादः क्रियते तेनैव स्फोटः अभिव्यक्तो भवति, येन शाब्दबोधः भवति ।।

वेदान्तसूत्रभाष्यस्य देवताधिकरणे "**शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्**"[४] इति भाष्ये आचार्यशङ्करेण शब्दनित्यत्वप्रतिपादकश्रुति-उपनिषद्वाक्यानि उद्धरता स्फोटस्य स्थापनाकरणस्यानन्तरं मीमांसासम्मतवर्णवादस्य समर्थनं तथा स्फोटवादस्य खण्डनं कृतम्। स्फोटस्यानङ्गीकारपक्षे तेषां तर्काणां संक्षिप्तविवरणं एवं प्रकारेणास्ति - एष तदेव गकारो वर्त्तते (सोऽयं गकारः) एवं प्रतीत्या वर्णानां नित्यता सिद्धा भवति। एतानि वर्णान्येवअर्थबोधकानि भवन्ति, एवं महर्षि उपवर्षस्य विचारः वर्त्तते। वर्णेष्वनेकता, अभिव्यञ्जकवायोः कण्ठादिस्थानेषु संयोगविभागस्य विचित्रतायाः कारणेन भवति।

[१] महाभाष्य – ६/१/१०९

[२] वाक्यपदीयम् – १/३७-३८

[३] तदेव

[४] वेदान्तसूत्रम् – २८

स्वरूपतः वर्णो भेदरहितो भवति। चित्ते एकत्वस्याभासः भवति, स वर्णविषयको भवति। स्फोटाङ्गीकारेतद्विषयकबुद्धौ'ग्''औ 'तथा विसर्गस्यानुवृत्तिः कथं भवति? यथा क्रमानुसारं पिपीलिकासु पङ्क्तिबुद्धिः भवति तथैव क्रमानुसारं वर्णेषु पदबुद्धिः भविष्यति। स्फोटवादिना दृष्टवर्णान् अर्थवाचकान् न मत्वा अदृष्टस्य कल्पना करणीया भवति, इदं गौरवं भवति।

वेदान्तसूत्रभाष्ये (देवताधिकरणे) भगवता शङ्कराचार्येण स्फोटवादस्य खण्डने प्रायः मीमांसकानामेव अनुकरण विहितं वर्त्तते। तस्य प्रारम्भः उपवर्षस्य "गकारौकारविसर्जनीयाः शब्दः" कथनेन भवति। तेषां कथनं यत्– 'गौ' पदे तथा 'गाम् आनय' अनेकेषु वर्णेषु अपि एकत्वप्रतीतिः एकार्थबोधकसम्बन्धात् औपचारिकी वर्त्तते। वास्तविकी नास्ति। अतः नदी, दीन एकार्थबोधः न भवति, यतोहि यथा क्रमानुसारं पिपीलिकानां चलनमेव पङ्क्तिरुच्यते तथैव क्रमानुसारं वर्णाएव बुद्ध्यारूढा भवन्ति। वर्णानां एकत्वेऽपि क्रमविशेषात् हि पदविशेषस्य प्रतीतिः भवति। अतः अर्थबोधे पदरूपक्रमेण समुदिता वर्णा एव निमित्तानि भवन्ति।।

'वर्णा एव तु शब्दः' इति भगवानुपवर्षः। यत्तु उत्पन्नप्रध्वंसित्वं वर्णानामुक्तं; तन्न। 'स एवायं गकारः' इति प्रत्यभिज्ञानेन स्थिरत्वसिद्धेः। न चेयं प्रत्यभिज्ञा सादृश्यविषयिणी, न त्वैक्यविषयिणीति वाच्यम्। ऐक्यविषयकत्वे बाधकाभावात्। नापि प्रत्यभिज्ञानमिदम् आकृतिविषयकं, न व्यक्तिविषयकमिति वाच्यम्। व्यक्तेरेव प्रत्यभिज्ञानात्। यदि हि प्रत्युच्चारणं गवादिव्यक्तिवत् अन्या अन्या वर्णव्यक्तयः प्रतीयेरन् ततः आकृतिनिमित्तकं प्रत्यभिज्ञानं स्यात्। न त्वेतदस्ति। वर्णव्यक्तय एव हि प्रत्युच्चारणं प्रत्यभिज्ञायन्ते। 'द्विः गोशब्दः उच्चारितः' इति हि प्रतीतिः, न तु 'द्वौ गोशब्दौ' इति।

ब्रह्मैव मायायाः आश्रयं नीत्वा जगद्रूपस्य जनकं भवति। ब्रह्म प्रकाशस्वरूपमस्ति तथा तस्य शक्तिरूपं चिदिच्छा, स्वातन्त्र्यं, विमर्शादिशब्दैः कथ्यते। शक्तिर्शक्तिमतोः अभेदप्रतिपादकत्वात् एते अद्वैतवादिनो मन्यन्ते। ध्वनिभिः अभिव्यक्ते एव स्फोटरूपशब्दस्योपलब्धिः भवति सर्वदा। स्वयं स्फोटः कालकृतभेदैः रहितोऽस्ति, परन्तु स्वकीयस्य अभिव्यञ्जकध्वनेः कालस्य तस्मिन्नारोपे ध्वनेः कालपर्यन्तं सोऽपि प्रभासते।